# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3)(Old)** | **प्रश्नपत्रम् – 4** | गुणाः –70 |
| विषयः – संस्कृतसम्भाषणम् | **कोड –O.E.2.3.3** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – द्वितीया दीक्षा | |

### प्रथमान्वितिः (Unit 1) गुणाः

**प्रश्न १ अधोलिखितशब्दानां एकवचन-द्विवचन-बहुवचनरूपाणि लिखन्तु।** १५

१ मधु २ धेनु ३ कपि ४ कर्तृ

५ नदी ६ भू ७ मति ८ वारि

९ गो १० राजन् ११ भवत् १२ ग्लौ

१३ विद्वस् १४ नामन् १५ चक्षुष् १६ आत्मन्

१७ ऋत्विज् १८ जगत् १९ वाच् २० क्षुध्

**प्रश्न २ अधोलिखितानां प्रथमान्तपदानां लिङ्ग- वचन-अन्तिमवर्णः च निर्दिशत।** १०

**यथा – पाणिनिः - पुल्लिङ्ग एकवचन इकारान्तः**

१ माता २ भगवान् ३ कविः ४ सरितः

५ विद्वांसः ६ सहपाठिनः ७ उक्तिः ८ कृतिः

९ गुरुः १० सूत्राणि ११ भूभृताम् १२ कर्तुः

### द्वितीयान्वितिः (Unit 2)

**प्रश्न ३ (अ) कानिचन अष्ट द्वितीयान्तानि पदानि चित्वा लिखत।** ८

१ विना वेदं विना गीतं विना रामायणीं कथाम्।
विना कविं कालिदासं, भारतं भारतं नहि।

२ जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति।

चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्सङ्गतिं कथय किं न करोति पुंसाम्॥

**प्रश्न ३ (ब) अधोनिर्दिष्टेषु वाक्येषु वाक्यद्वयं योजयित्वा एकं वाक्यं लिखत। (सप्तैव कानिचन)** ७

**उदा – १ शिक्षकः छात्रं पृच्छति। २ शिक्षकः प्रश्नं पृच्छति।**

**उत्तरम् – शिक्षकः छात्रं प्रश्नं पृच्छति।**

१ गोपः गां दोग्धि। गोपः पयः दोग्धि।

२ साधुः बालकं वदति। साधुः धर्मं वदति।

३ याचकः धनिकं याचति। याचकः धनं याचति।

४ रमेशः मित्रं कथयति। रमेशः यात्रावृत्तान्तं कथयति।

५ वाल्मीकिः लवकुशौ अकथयत्। वाल्मीकिः रामायणं अकथयत्।

६ बालकः गुरुम् अपृच्छत्। बालकः गृहकार्यम् अपृच्छत्।

७ गुरुः छात्रं बोधयति। गुरुः पाठं बोधयति।

८ यात्रापत्रनिरीक्षकः यात्रिणः पृच्छति। यात्रापत्रनिरीक्षकः यात्रापत्रं पृच्छति।

९ आरक्षकः चोरान् दण्डयति। आरक्षकः शतं दण्डयति।

**प्रश्न ४ कोष्टके लिखितेषु शब्देषु द्वितीयान्तैः कानिचन दश रिक्तस्थानानि पूरयत।** १०

**उदा – अर्चकः ......... पूजयति। (भगवत्)**

**उत्तरम् – अर्चकः भगवन्तं पूजयति।**

१ रामः .................... नमति। (मातृ)

२ गोपालः .................... दोग्धि। (धेनु)

३ आचार्यः .................... पाठयति। (छात्र)

४ छात्रौ .................... गच्छतः। (देवालय)

५ दूतः .................... सूचयति। (राजन्)

६ सैनिकः .................... धारयति। (वर्मन्)

७ अध्यापकः छात्रं ....................पृच्छति। (प्रश्न)

८ रमेशः .................... कथयति। (मित्र)

९ बालकः ....................अपृच्छत् । (गुरु)
१० शिक्षकः .................... ददाति । (लेखनी)
११ कृष्णः .................... वादयति । (वेणु)
१२ तृषितः पान्थः .................... पिबति । (वारि)

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितेषु वाक्येषु दशवाक्यानि बहुवचने परिवर्तयत । १०**

**उदा – एषः बालकः अस्ति ।**

**उत्तरम् – एते बालकाः सन्ति ।**

१ सः मयूरः अस्ति ।
२ एषा मम लेखनी।
३ एतस्मिन् बहुगुणाः सन्ति ।
४ एतां संस्कृतं पाठयामि।
५ एतत् मम पुस्तकम्।
६ अहं छात्रः अस्मि।
७ मम कः अपराधः अस्ति ।
८ त्वया सह कः यास्यति ।
९ तुभ्यं द्रव्यं दास्यामि।
१० आवाभ्यां तक्रं न रोचते।
११ इदं नगरं सुन्दरम् अस्ति ।
१२ इयं कवयित्री अस्ति ।

**प्रश्न ६ अधोलिखितेषु अष्टानाम् अव्ययानां वाक्यप्रयोगं कुरुत । ८**

१ विना २ श्वः ३ यदि...तर्हि ४ नमः
५ उच्चैः ६ प्रातः ७ अद्य ८ च
९ बहिः १० एव

**प्रश्न ७ अधोलिखितयोः श्लोकयोः चत्वारि अव्ययानि चित्वा लिखत । २**

१ यत्र नार्यस्तु पूज्यन्ते, रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते, सर्वास्तत्राफलाः क्रियाः॥

२ यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य, तदात्मानं सृजाम्यहम्॥